# shArikAstotram 2

# शारिकास्तोत्रम् २

## Document Information

Text title : shArikAstotram 2

File name : shArikAstotram2.itx

Category : devii, devI, dashamahAvidyA, dhyAnam

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : BhaktivivekasAra

Latest update : November 18, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 7, 2022

*sanskritdocuments.org*

# शारिकास्तोत्रम् २

श्रीशारिकाध्यानम् अथवा शारिकास्तुतिः
बीजैः सप्तभिरुज्ज्वलाकृतिरसौ या सप्तसप्तिद्युतिः
सप्तर्षिप्रणताङ्घ्रिपङ्कजयुगा या सप्तलोकार्तिहृत् ।
कश्मीरप्रवरेशमध्यनगरीप्रद्युम्नपीठे स्थिता
देवी सप्तकसंयुता भगवती श्रीशारिका पातु नः ॥

जय भगवति विन्ध्यवासिनि श्मशानवासिनि कैलासवासिनि
हुङ्कारिणि कालायनि कात्यायनि हिमगिरितनये कुमारमातः
गोविन्दभगिनि शितिकण्ठकण्ठाभरणे अष्टादशभुजे
भुजगवलयमण्डिते केयूरहाराभरणे जय खड्गत्रिशूलडमरु-
मुद्गरपरशुशशिकलाशरचापवराभयपाशपुस्तककपालखट्वाङ्ग-
गदामुसलतोमरवरहस्ते कृपापरे प्रभूतविविधायुधे चण्डिके
चण्डघण्टे किरातवेषे ब्रह्माणि रुद्राणि नारायणि ब्रह्मचारिणि
वेदमातः गायत्रि सावित्रि सरस्वति सर्वाधारे सर्वेश्वरि विश्वेश्वरि
सर्वकर्त्रि समाधिविश्रान्तिमये चिन्मये चिन्तामणिस्वरूपे
कैवल्ये कैवल्यस्वरूपे शिवे निराश्रये निरुपाधिमये
ब्रह्मविष्णुमहेश्वरनमिते मोहिनि तोषणि भयङ्करनाशिनि
दितिसुतप्रमथिनि काले कालाग्निशिखे कालरात्रे अजे नित्ये
सिंहरथे योगरते योगीश्वरनमिते भक्तजनवत्सले सुरप्रिये
कारुण्ये दुर्गे दुर्जये हिरण्ये शरण्ये कुरु मे जयं, कुरु मां दयां
कुरु मां कृपाम् ॥

श्रीशारिके शरण्ये त्वां मयि दासे कृपां कुरु ।
ऋणं रोगं भयं शोकं रिपून्नाशाय सत्वरम् ॥

प्रद्युम्नशिखरासीनां मातृचक्रोपशोभिताम् ।
पीठेश्वरीं शिलारूपां शारिकां प्रणमाम्यहम् ॥

उमा माऽवतु कामा च चार्वङ्गी टङ्कधारिणी ।
तारा च पार्वती चैव यक्षिणी शारिकाष्टमी ॥

शन्तिं नयस्याशु जनस्य पापं रिक्तत्वमर्थैन निराकरोषि ।
कायं निषिञ्चस्यापि भाग्यपूरैः प्रगीयसेऽतः खुल शारिकात्वम् ॥

इति शारिकास्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*shArikAstotram 2*

pdf was typeset on May 7, 2022

Please send corrections to *sanskrit@cheerful.com*